छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणानि ।	छन्दसामुदाहरणानि ।
मञ्जरी पञ्चमे नवमे च यतिः ।	सजसा यलौ गिति शरदृषेर्मञ्जरी ।।ऽ,।ऽ।,।।ऽ,।ऽऽ,।,ऽ	
कुमारी अष्टमे नवमे च यतिः ।	नजभजगैर्गुरुश्च वसुवट् कुमारी ।।।,।ऽ।,ऽ।।,।ऽ।,ऽ,ऽ	
सुकेसरम्	नरनरलैर्गौ च रचितं सुकेसरम् ।।।,ऽ।ऽ,।।।,ऽ।ऽ,।,ऽ	
चन्द्रौरसः	म्नौ न्यौ लगौ चेदिह भवति च चन्द्रौरसः ऽऽऽ,ऽ।।,।।।,।ऽऽ,।,ऽ	
चक्रपदम्	चक्रपदमिह भननगलगुरुभिः ऽ।।,।।।,।।।,।।।,।,ऽ	
वासन्ती	वासन्तीयं स्यादिह खलु मतौ न्यौ गौ चेत् ऽऽऽ,ऽऽ।,।।।,।ऽऽ,ऽ,ऽ	
पञ्चदशाक्षरा वृत्तिः । अतिशर्करी ।		
शशिकला	गुरुनिधनमनुलघुरिह शशिकला ।।।।।।।।।।।।,ऽ	मलयजतिलकसमुदितशशिकला व्रजयुवतिलसदलिकगगनगता । सरसिजनयनहृदयसलिलनिधिं श्रुतशुत विततरभसपरितरलम् ॥
सक् अक्षाः षड्भिर्नवभिश्च यतिः ।	सगियमपि च रसनव-रचितयतिः ।।।।।,।।।,।।।।।,ऽ	अयि सहचरि ! रुचिरतरगुणमयी त्वदिमवसतिरनपगतपरिमला । मगिव निवस विलसदनुपमरसा सुसखि ! सुदितदनुजदलनहृदये ॥
मणिगुणनिकरः अष्टभिः षड्भिश्च यतिः ।	षसुमुनिवतिरिति मणिगुणनिकरः ।।।।।।,।,।।।।।,ऽ	नरकरिपुरवतु निखिलसुरगति- रमितमहिमभरसहजनिवसतिः । अनवधिमणिगुणनिकरपरिचितः सरिदधिपतिरिव हृततनुविभवः ॥
मालिनी अष्टभिः सप्तभिश्च यतिः ।	नगमयमयुतेयं मालिनी भोगिलोकैः ।।।,।।।,ऽऽऽ,।ऽऽ,।ऽऽ	नगमदमलतपत्रा पीतकौषेयवासा रुचिरशिखिशिखण्डावद्धबर्हिल्लपाशा । अपृथुनिहितमंसे वंशमुत्कालयन्ती हृतमधुरिपुलीला मालिनी पातु राधा ॥
लीलाखेलः	एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः ऽऽऽ,ऽऽऽ,ऽ,ऽ,ऽऽऽ,ऽऽऽ,ऽ	पायादो गोविन्दः कालिन्दीकूलचौर्यचक्रे राधोल्लासक्रीडलोपीभिः सार्द्धं लीलाखेलः । मन्दाकिन्यास्तीरोपान्ते स्वैरक्रीडाभिर्लोलो यद्देवानामीशः सर्वेशाभिः खेलन्तीभिः ॥
विपिनतिलकम्	विपिनतिलकं नसनरेषयुग्मैर्भवेत् ।।।,।।ऽ,।।।,ऽ।ऽ,ऽ।ऽ	विपिनतिलकं विकसितं वसन्तागमे मधुलतमदैर्मधुकरै रङ्गिर्वृतम् । मलयमरुता रचितलास्यमालोकयन् व्रजयुवतिभिर्विहरति स सुखो हरिः ॥
तूणकम्	तूणकं समानिकापदद्वयं विशान्तिमम् ऽ,।,ऽ।ऽ,।ऽ।,ऽ,।,ऽ।ऽ,।ऽ	सा सुवर्णकेतकं विकाशि भृङ्गपूरितं पञ्चबाणबाणजालपूर्णदेहमतूणकम् । राधिका वितर्क माधवाद्य मासि माधवे मोहमेति निर्भरं त्वया विना कलानिधे ! ॥
चन्द्रवेला सप्तमे अष्टमे च यतिः ।	म्नौ मो यौ चेद्भवेतां सप्ताष्टकैश्चन्द्रवेला ऽऽऽ,ऽ।ऽ,ऽऽऽ,।ऽऽ,।ऽऽ,	विच्छेदे ते मुरारे ! पाण्डुमकाशा क्षणाङ्गी म्लानच्छायं दुकूलं न भ्राजते बिभ्रती सा । राधामोदस्य गर्भे लीना यथा चन्द्रवेला किंवार्ता त्वां स्मरन्ती धत्ते ध्रुवं जीवयोगम् ॥
चित्रा	चित्रा नामच्छन्दश्चित्रचेत् त्रयो मा यकारौ ऽऽऽ,ऽऽऽ,ऽऽऽ,।ऽऽ,।ऽऽ	गोपाली लीलालोला यदतु कलिन्दात्मजान्ते खेलन्मुक्ताहारा वन्यसुमसुसज्जा चित्रा । कंसारातेर्मूर्तिस्तद्वन्मे हृदि नित्यं तेन कोऽन्यः स्वर्गो मोक्षो वाञ्छाद्विद्यते तत्र जाने ॥